॥ॐनमो गणेशाय॥ॐ ह्रीं श्रीं अर्हं श्रीगौतमाय नमः॥ संसारदुःखदैन्यस्यप्रतिहंतृभिर्दिनावहे
सुधारेसुधाधारेनमस्तुभ्यंकृपामये॥१॥ एवंमयाश्रुतमेकस्मिन्समयेभगवानकोशांव्यांमहा
नगर्य्यांविहरतिस्मकंटकसंज्ञकेमहावनखंडेपासिनारामेमहताभिक्षुसंघेनसार्द्धंपंचमात्रैर्भिक्षु
शतैस्संवरवद्भिस्त्यक्तोपाधिभिर्वीतसंक्लेशैर्महासत्वैःसर्व्वशुद्धधर्म्मगुणसमन्वागतैःपरिवृतःपुरस्कृतो
धर्म्मदेशयतिस्मतेनखलुपुनःसमयेनकोशांव्यांमहांनगर्य्यांसुदत्तोनामगृहपतिःप्रतिवसतिस्म
उपशांतेन्द्रियउपशांतमानसोवहूपाध्योवहुपुत्रोवहुदुहितृकोवहुभृत्यपरिजनसंपन्नश्चतद्दर्शयतु
भगवांस्तादृशंधर्म्मंपर्य्यायंयेनदरिद्राःसंतोयदरिद्राभवेयुःव्याधिताश्चसंतोयव्याधिताभवेयुः
वहुधनधान्यकोशकोष्ठागारसंपन्नाश्चभवेयुःप्रियामनःआपाश्चमनोज्ञाःसंदर्शनीयाश्चभवे
युःदानपतयोमहादानपतयश्चस्त्रीणांहिरण्यसुवर्णधनधान्यरत्नकोशकोष्ठागाराश्चभवेयुःमणिमु

DR BHAU DAJI

क्ताफलवैदूर्य्यवज्रशंखशिलप्रवालजातरूपरजतसमृद्धाश्चभवेयुःसुपतिष्ठितसुसमृद्धगृहपुत्रदा
रकुटुम्बाश्चभवेयुःएवमुक्तेभगवानसुदत्तंगृहपतिमेतदवोचत्अस्तिगृहपतेनेकशतसहस्रकृत्वःपदक्षि
णीकृत्यएकांतेन्यसीदत्एकान्तेनिषण्णश्चसुदत्तोगृहपतिर्लब्धावसरोभगवंतमेतदवोचत्पृच्छाम्य
हंभगवंतंनवागतमर्हन्तंसम्यक्संबुद्धंकिंचित्पदेशंसचेन्मेभगवान्अवकाशंकुर्य्यात्पृष्टप्रश्नव्याक
रणायएवमुक्तोभगवान्सुदत्तंनामगृहपतिमेतदवोचत्पृच्छगृहपतेयद्यदेवाकांक्षसिअर्हंतेय
द्यपृच्छतिप्रश्नव्याकरणायचित्तमाराधयिष्येएवमुक्तेसुदत्तोगृहपतिःसाधुभगवन्निति कृत्वाभगवंतं प्रतिश्रुत्य
भगवंतमेतदवोचत्कथंभगवन्कुलपुत्रोवाकुलदुहितावादरिद्रोभूत्वाअदरिद्रोभवतिव्याधिश्चभूत्वाअव्या
धितोभवतिअथखलुभगवान्जानन्नेवसुदत्तंगृहपतिमेतदवोचत्किमितित्वंतेषुषप्पेसंख्येयेषुकल्पे
ष्वतीतेषुप्रमाणेष्वतीतेतेनकालेनतेनसमयेनभगवान्वज्रधरसागरनिर्घोषोनामतथागतोर्ह

न्सम्यक्संबुद्धेलोकउत्पादादिविद्याचारणसंपन्नोलोकविदनुत्तरः पुरुषादम्यसारथिः शास्तदेवानां
चमनुष्याणांचबुद्धोभगवानतस्यतथागतस्यांतिकान्मयागृहतेऽयंवसुधारानामधारणीश्रुता श्रु
त्वोद्गृहीताधारितावाचितापर्यवाप्तापरावर्तितापरेभ्यश्चविस्तरेणसंप्रकाशितास्यादहमप्येतर्हिगृहपतेतांधारिणींभविष्यामि यद्यस्याधारिणीयाः प्रभावेणकुलपुत्रमानुष
नविहेठयंतिअमानुषानविहेठयंतियक्षानविहेठयंतिराक्षसानविहेठयंतिराक्षसानविहेठयं
तिप्रेतानविहेठयंतिपिशाचानविहेठयंतिभूतानविहेठयंतिकुंभांडानविहे
ठयंतिस्कंदानविहेठयंतिमानुषानविहेठयंतिऽपस्मारानविहेठयंतिउन्मादानविहेठयंतिपूतना
नविहेठयंतिमानुषानविहेठयंतिकटपूतनानविहेठयंतियातुधानानविहेठयंतिमूत्राहारानविहेठयं
तिरुधिराहारावि ष्ठाहारावसाहारामांसाहारास्नेह्माहारापूयाहारासिंहव्याघ्रकाकाहाराःखेना

हाराःमेदाहारामज्जाहाराजातीहाराजीवितहाराबाल्याहारामांस्याहाराःखेलाहारायावदुच्छि
ष्टाहारानविहेठयंतियस्यवेयंगृहपतेधारणीश्रद्दधिष्यतिकुलपुत्रस्यवाकुलदुहितुर्वाहस्त्यगताह
स्तगतापुस्तगताश्रुतिमात्रगतापर्यवाप्तापरावर्तितपरेभ्यःविस्तरेणसंप्रकाशितावाचितालिखिता
अनुमोदितापरेभ्यश्चसंप्रकाशितावभविष्यतिनस्यकुलपुत्रस्यवाकुलदुहितुर्वादीर्घरात्रमर्थायसुख
यहिताय क्षेमायसुभिक्षायोगसंभारायभविष्यतियश्चेमांवसुधारानामधारिणींतथागतेभ्यार्हद
भ्यःसम्यक्संबुद्धेभ्योमहतीमुदारांपूजांकृत्वानमस्कृत्वाअर्चयेतअहोरात्रेश्चतुरोवारानतस्यदेवता
आत्ममनस्काःप्रमुदितापीतिसौमनस्याजातांस्वयमेवागत्यधनधान्यहिरण्यसुवर्णरत्नवृष्टिंपातयि
ष्यंतितेपीतास्तथागतःशासनपीताःबुद्धप्रज्ञप्तापीताधर्मप्रज्ञप्तापीतासंघप्रज्ञप्तापीताःमम ध
र्मभाषणनकस्याशयेनचउन्मोरत्नत्रयायउन्मोभगवतेवज्रधरसागरनिर्घोषाय तथागतायार्ह

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

नमस्यक्संबुद्धाय तद्यथा ॐश्रींसुरूपेसुवदने भद्रे सुभद्रेभद्रवति मंगलेसुमंगलेमंगलवति अगाले अग
लवति चंद्रेचंद्रवति अचले अचलवति वपलेउद्द्योतिनि उद्रेदिनि उद्रेदिनि उद्द्योतिनि शिष्यवति धन
वतिधान्यवतिउद्द्योतवति श्रीमति श्रीवति प्रभवति अमले विमले निर्मलेरुरुमे सुरूपे सुरूपविमले अर्च
नस्ते अतनस्ते वितनस्ते अनुमते अवनतहस्ते विश्वनमि विश्वनधि विश्वरूपिणि विश्वशिरे विशुद्धशील
विगृह्नीये विशुद्धनीयेऊर्जरे अनुत्तरे अंकुरे मंकुरे प्रभंकुरे नंकुरे ररमे रिरिमे रुरुमे खखमे खिखिमे धूधूमे
धधमे धिधिमे धूधूमे ततरे ततरे कुरे कुरे तरेतरे ततरे ततरे तारय तारय मांसर्वसत्वांश्चवज्रेवज्रगर्भे वज्रोप
मे वज्रिणि वज्रवति उद्धेबुद्धे रुद्धे रुद्धे दुद्धे दद्धे धद्धे रद्धे वरदे आवर्तनि प्रवर्तनि निवर्तनि निवर्धनि
प्रवर्धनि वर्द्धनिनिष्पादिनि वज्रधरसागरनिर्घोषंतथागतं अनुस्मर सर्वतथागत सत्यमनुस्मर संघसत्य
मनुस्मरस्मरअनिहारि अनिहारितप२ रुद२ पूरय२ भगवतिवसुधारे समसपरिवारस्यसर्वेषांचसत्वा

राम
३

मनुस्मरस्वाहा२

नांचभद्रेतर२ भरणि२ शांतिमतिजयमति महामति सुमंगलमति पिंगलमति सुभद्रमति शुभमति
मति२ चंद्रआगच्छसमयमनुस्मरस्वाहा आधारआकारमनुस्मरस्वाहा स्वभावमनुस्मरस्वाहा धृतिमनुस्मर
स्वाहा सर्वतथागतसत्यमनुस्मरस्वाहा सर्वतथागतानांविजयमनुस्मरस्वाहा स्वभावमनुस्मरस्वाहा
सर्वसत्वमनुस्मरस्वाहा सर्वतथागतविजयमनुस्मरस्वाहा स्थियमनुस्मरस्वाहा विजयमनुस्मरस्वा
हा सर्वसत्वविजयमनुस्मरस्वाहा सर्वत गतविजयमनुस्मरस्वाहा ॐ ह्रीं श्रीं वसुमुखीस्वाहा ॐ
श्रीवसुश्रियेस्वाहा ॐवसुमतिस्वाहा ॐवसुमतिश्रियैस्वाहा ॐवसुदेस्वाहा ॐवसुस्वेस्वाहा ॐवसुं
धरिस्वाहा ॐधरणिधारणिस्वाहा ॐसुमतिश्रियेस्वाहा ॐसमयेसौम्येसमयकरिमहासमयेस्वा
हा ॐश्रियेस्वाहा ॐश्रीकरिस्वाहा ॐधनकरिस्वाहा ॐधान्यकरिस्वाहा मूलमंत्रं ॐश्रियेश्रीकरि
धनकरिधान्यकरिरत्नवर्धनिस्वाहा। साधयमंत्रं ॐवसुधेस्वाहा हृदयं। ॐलम्पेलम्पेस्वाहा ॐ

×हृदयमनुस्मरस्वाहा उष्णीषविजयमनुस्मरस्वाहा विजयमनुस्मरस्वाहा विजयमनुस्मरस्वाहा

श्रीः

उपहृदयं उंलक्ष्मीभूतलनिवासिनिस्वाहा ॐथंदं उंध्यानपात्रावहस्वाहा मादूरगामिनि अनुत्पो नमो
नंद्वाणांमुत्पादिनिउत्पन्नानांद्वाणांवृद्धिकरि उंटिलिंइभइभआगच्छ२ भगवतिमाविलंबमनो
रथंमेपूर२ पूरय२ दशभ्योदिग्भ्योयथोदकंधाराःपरिपूर्यंतिमदीयंतथातमांसिभास्करोरश्मिनाविधा
पयतिविरंतनानियं शशीशीतांशुनानिष्पादयत्यौषधानि इंद्रश्चैवयमश्चैववरुणोधनदोयथा।
मनोनुगामिनींसिद्धिंचिंतयंतिसदानृणां ९ तथेमान्मेयथाकामंचिंतितंसततंमम पूरयंतुपुस्सिद्धं
तुसर्वमंत्रपदानिह तथास्वा सुटसुट खटर खिटि२ खुटर मुंकु२ चंव२ मुरुंव२ तर्पणि२ तर्जणि२
दहि२ दापय२ उत्तिष्ठ२ हिरण्यसुवर्णप्रदापर्यस्वाहाः अन्नपानायस्वाहा गोःस्वाहा दिग्भ्योविदिग्भ्यः
स्वाहा उत्पादयंतुमेकांक्षांविरहजं अनुमोदयंतुइमेमंत्रपदाः उंहूंह्रीं एंहिभगवतिददापयस्वा
हा एतद्भगवत्यार्यवसुधारायाहृदयंमहापापकारिणोपिसुद्धंतिपुरुषस्यमाणाश्चभोगानद

२ दातिइप्सितंमनोरथंचपरिपूरयतिसर्वेकामदुहानन्यानकामानकामयतेतांस्तानईप्सितान
परिपूरयति मूलविद्या उंनमोरत्नत्रयायनमोदेविधनददुहितेवसुनिपातयेस्वाहा गोःस्वाहा सुर
भेस्वाहाः उंवसुस्वाहा वसुधिपतेस्वाहा इंद्रायस्वाहायमायवरुणायस्वाहा गोःस्वाहासुरभेस्वा
हा उंवसुस्वाहा वसुधिपतेस्वाहा इंद्रायस्वाहायमायस्वाहा वरुणायस्वाहा वैश्रवणायस्वाहा व
सुधारेधनधारांपातय२ कुरु२ धनेश्वरि धनदेरत्नदे हेमधनरत्नसागरमहानिधानेनिधानकोटीशतसहस्र
परिवृते एह्येहि२ भगवतिप्रविश्यमत्पुरंमद्भवने महाधनधान्यधारांपातय२ कुरु२ उंहूंवट
कैलासवासिन्येस्वाहा महाविद्याये वसुधारेमहावृष्टिनिपातनिवसुधारेस्वाहा मूलहृदयं उंवसुधा
रेसर्वार्थसाधिनिसाधय२ उद्धरउद्धररत्न२ सर्वार्थनिश्चियंत्रंतंत्रंवट२ चव२ ट२ चंव ७७ दंडेस्वाहा
परमहृदयंउंनमोभगवतेआर्यतेचेडिकेयथाजीवसंरक्षणिफलहस्तेदिवारूपेधनदे वादे शुद्धे वि

शुद्धे शिवकरि शांतिकरि भयनाशिनि भयदूषणि सर्वदुष्टान् भंजय२ मोहय२ जंभय२ स्तंभय२ मम शां
तिं पुष्टिं वश्यं कुरु२ स्वाहा लेवडिका धारणी इयं सा गृहपते३ मानिवसुधारिणी मंत्रपूदानि सर्व्व
तथागतानां अर्हतां सम्यक्सम्यक् संबुद्धानां पूजां कृत्वाक्षणमात्रानावर्त्तयेत् ततः सिद्धिर्भवंति यस्मिं
श्चद्यानेइयं महाविद्यावाच्यते सादिकूपूज्यमानाभवंति पौष्टिककार्यं स्वगृहेपरगृहेवाभवति तथा
गतस्यार्यविलोकतेश्वरस्यबमंत्रदेवतायाश्चायतः सर्व्वबुद्धिवोधिसत्वेभ्योनमस्कृत्वाशुभेस्थानेको
शिकोष्ठागारवाचंदनेनचतुरस्रंमंडलंकृत्वात्रीन्वारानावर्त्तयेत् ततोगृहपतिः कुलपुत्रस्यवाकुलदु
हितुर्वा महापुरुषमाश्रयावसुधारायागृहंपरिपूरयतिसर्व्वधनधान्यहिरण्यरत्नसुवर्णैः सर्व्वोपकरणै
श्चसर्व्वोपद्रवांश्चनाशयतितेनहित्वंगृहपतेउदग्रहीत्वेमांवसुधारानामधारिणीधारयवाचयदेशय
उद्ग्रहयपर्यवाप्नुहिप्रवर्त्तयअनुमोदयपरेभ्यश्चविस्तरेणसंप्रकाशयतद्भविष्यतिदीर्घरात्रंअर्थायहि ॥ राम
५

तत्यसुखायलोकानुकंपायदेवमनुष्याणामर्थायहितायसुखायभगवन्निति सुचंद्रोगृहपतिर्भगवंतमेतदवो
सुधारानामधारिणीं श्रुत्वाहृष्टतुष्टउदग्रआत्तमनाप्रमुदितः प्रीतिसौमनस्यंजातोभगवतश्चरणयो
र्निपत्यकृतकरसंपुटोभूत्वाभगवंतमेतदवोचत् उद्गृहीतामेभगवन्नियंवसुधारानामधारिणी
प्रकीर्त्तिताधारितावाचितापर्य्यवाप्ताअनुमोदितामनसासुपरिचिंतावपरेभ्यश्चविस्तरेणइदानींसं
प्रतिकाशयिष्यामीति अथतत्क्षणमात्रेणसुचंद्रोनामगृहपतिः परिपूर्णकोष्ठशकोष्ठागारोवभूवः
अथखलुसुचंद्रोगृहपतिर्भगवंतंअनेकशतसहस्रकृत्वःप्रदक्षिणीकृत्यभगवतः पादौशिरसाभिवन्द्य
भगवंतमनेकशः पुनःपुनरवलोक्यभगवंतोऽन्तिकात्प्रक्रांतः अथखलुभगवानायुष्मंतमानंदमामं
त्रयतेस्मआगच्छत्वमानंदसुचंद्रस्यगृहपतेरगारंगत्वापरिपूर्णंपश्यधनधान्यहिरण्यरत्नसुवर्णैः स
र्व्वोपकरणैश्चमहाकोशकोष्ठागाराणिचपरिपूर्णानि अथखल्वायुष्मानानंदोभगवतः प्रतिश्रुत्यये

नकोशांबीमहानगरीयेनसुचंद्रस्यगृहपतेरगारंतेनोपसंक्रान्तःउपसंक्रम्यअभ्यंतरंप्रविश्याद्राक्षीत्।
ततपरिपूर्णंसर्वधनधान्यहिरण्यरत्नसुवर्णैःसर्वोपकरणैश्चमहाकोशकोष्ठागाराणिचपरिपूर्णानि
दृष्ट्वा दृष्ट्वा विस्मितोहृष्टःतुष्टःउदग्रआत्ममनापमुदितःप्रीतिसौमनस्यंजातंयेनभगवांस्तेनोपसं
क्रान्तःउपसंक्रम्यभगवतःपादौशिरसाभिवंद्यभगवंतमेतदवोचत्कोभगवन्हेतुःकःप्रत्ययस्य
येनसुचंद्रोगृहपतिर्महाधनोमहाभोगाशयःमहाकोशकोष्ठागारःसर्वधनधान्यहिरण्यसुवर्णसमृद्धः
संवृत्तोभगवानाहश्राद्धानंदसुचंद्रोगृहपतिःपूर्वमश्राद्धःकल्याणाशयःउद्गृहीतावतेनेयंवसुधारा ना
मधारिणीधारितावाचितादेशिताग्राहितापर्युद्ग्रहीकृतानुमोदिताइदानींपरेभ्यश्चविस्तर
णसंप्रकाशयपर्युद्ग्रहंप्रवर्तयनिवर्तयप्रकटीकुरुअनुमोदयपरेभ्यश्चविस्तरेणसंप्रकाशयस्वे
यंकुलपुत्रस्यवाकुलदुहितुर्वाहृदयगताहस्तगतागृहगतापुस्तकगताभविष्यतिनतस्यरोगद्रमि

रात्र
६

त्रमरकोपइवकंतारादयाभविष्यतिक्रमेणविभवास्तस्यप्रवर्द्धिष्यंतेनष्टनिष्ठतिबहुजनहिताय च
बहुजनसुखायलोकानुकंपायमहतोजनस्यकार्यस्यार्थायसुखायदेवानांचमनुष्याणांचनाहमानंद
तंधर्मंसमनुपश्यामिसदेवलोकेसलोकेसनारकेसवह्मलोकसश्रमणब्राह्मणिकायांप्रजायांस
देवमानुषासुरायांचइमांवसुधारानामधारिणींमहाविद्यांमन्यथाकरिष्यतिअतिक्रमिष्यतिवानै
ततस्थानंविद्यतेततकस्यहेतोरयमेवाहंतेआनन्दवसुधारानामधारिणींमंत्रपदानचैतेस्त्रीणकुश
शलमूलानांसलानांश्रुतिपथमपागमिष्यंतिकःपुनर्वादोयेपुस्तकगतामपिकृत्वागृहेधारयिष्यंति
ततकस्यहेतोःसर्वतथागतानांह्येतदाकंसर्वतथागतैरेषाधारिणीभाषिताअद्धासितासुभाषि
मुदितासुभावितासुप्रकाशितासुप्रकीर्णकृतासुअनुमोदितासुधन्यास्तेपशस्तासंवर्तितासुविवृतासुप्रानीकृता
आराधितास्वाख्यातासुनिर्दिष्टासुसत्वानांचदरिद्राणांनानाव्याधिपरपीडितानांसर्वदुष्टभयापद्वा

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

र्णांवार्थीयेतिश्रानंदआह उद्गृहीतामेभगवन्निर्यंवसुधारानामधारिणीधारितावाचिताग्राहितादेशि
तापवर्तितापक्कीकृतानुमोदितामनसासुपरिचिंतिता अथखल्वायुष्मानानंदउच्छ्रयासनादेकांत
मुत्तरासंगंकृत्वादक्षिणजानुमंडलंपृथिव्यांप्रतिष्ठाप्ययेनभगवांस्तेनांजलिंप्रणम्यतस्थौविलग्यांकृतक
रसंपुटोभूत्वाइदमुदानयतिस्मअचिंत्योभगवान्बुद्धोबुद्धधर्म्मोप्यचिंत्य अचिंत्योहिप्रसन्नानांविपा
कश्चाप्यचिन्तयः१ शास्तायानहिसर्व्वज्ञजरामरणपारगः धर्म्मराजकुलंशाक्यबुद्धवीरनमोस्तुते २
अथखल्वायुष्मानानंदोहृष्टतुष्टउदग्रआत्तमनाःप्रमुदितःप्रीतिसौमनस्योजातोभगवंतमेतद
वोचत्कोनामानन्दभगवान्धर्मपर्यायःकश्चेनांधारयामिभगवानाह तेनहित्वमानंदसुचंदंगृह
पतिंपरिपृछेत्योपिधारयसर्व्वधनधान्यमित्यपिधारयसर्व्वतथागतश्शास्तावसुधारानामधारि
णीकल्पामित्यपिधारयइदमवोचद्भगवानात्तमनाःआयुष्मानानंदस्तेचमित्तवस्तेववोधिसत्वा राम
७

:साचसर्व्वावनीपर्व्वतदेवमनुष्यासुरागंधर्वाश्चलोकाभगवतोभाषितमभ्यनन्दन्नितिइमांवसुधा
रांयोवाचयतियःशृणोतिविधाकरणेनसपुमान्इहलोकविपुलंधनधान्यकोशकोष्ठागारसंपन्नो
भवति परलोकेतुसप्ताष्टभवान्नातिक्रामतिसततंहृदयेयोधारयतिसामृतसंजीवनीविद्या तथा
सौभाग्यमापदांनाशोराज्यपूजाश्रियांपतिःदीर्घायुःशाकिनीरक्षासुगतिस्याद्भवांतरे ।१ ।
आर्यवसुधारासंपूर्णाइयंविद्याइयंश्रीआर्यवसुधाराधनदपुत्रीयत्रधनादिकंतिष्ठतितत्रवा
च्यतेमुख्यगृहविषयेचत्वारथंभेचगोमयमंडलंकृत्वातन्मध्येचपंचममंडलोपरिउपविश्यउत्तरा
भिमुखाभूत्वापवित्रगात्रोवाचयति वामपार्श्वेउपविश्यधनिकः सावधानमनाशृणोति चि
तितिंतितार्थोभवति॥ ० ॥इतिवसुधारानामधारिणीमहाविद्यासमाप्ताः॥ ० १ ० १ राम
८